# संस्कृतवार्ताः

**दिनाङ्कः 13.01.2026**

**प्रातः - 06:55**

**प्रधानमन्त्री/युवनेतृ-संवाद-सम्मेलनम्**

राष्ट्रिय-युव-दिवसस्य अवसरे नवदिल्ल्याम् आयोजितस्य विकसित-भारत-यंग्-लीडर्स्-डायलॉग्-इत्याख्यस्य युवनेतृ-संवाद-सम्मेलनस्य समापनसत्रे प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् स्वामि-विवेकानन्दस्य जीवनम् अस्माकं सर्वेषां कृते मार्गदर्शकम् अस्ति। सः अवदत् यत् सः युवसन्ततिसु अतितरां विश्वसिति, यूनां सामर्थ्यं च तं प्रेरयति।

प्रधानमन्त्रिणा उक्तं यत् युवशक्तिः नवीनैः विचारैः, ऊर्जाभिः दृढसंकल्पेन च राष्ट्रनिर्माणे अग्रणीं भूमिकां निर्वहति। श्रीमोदी अवदत् यत् सप्तचत्वारिंशदधिक-द्विसहस्र-तमे वर्षे यदा देशस्य स्वतन्त्रतायाः शतं वर्षाणि पूर्णानि भविष्यन्ति, सः कालः अद्यतनयूनां जीवनस्य महत्त्वपूर्णक्षणं भविष्यति।

इतः पूर्वं प्रधानमन्त्री प्रदर्शनीं अवलोक्य युवप्रतिनिधिभिः सह संवादं च कृत्वा तेषां नवाचार-विचाराणां विषये सविस्तरं ज्ञातवान्। ध्यानास्पदमस्ति यत् जनवरी-मासस्य नवतः द्वादश-दिनाङ्कं यावत् आयोजिते 'विकसित-भारत-यंग्-लीडर्स्-डायलॉग्'-इत्याख्ये युवनेतृ-संवाद-सम्मेलने देशस्य पञ्चाशल्लक्षाधिकाः युवानः विभिन्न-स्तरे सहभागित्वम् आवहन्।

**भारत-जर्मनी**

भारत-जर्मनी-देशाभ्यां महत्त्वपूर्णानि नवदश सन्धिपत्राणि हस्ताक्षरैः प्रमाणीकृतानि, अपि च, उभाभ्यां देशाभ्यां रक्षौद्योगिक-सहयोगं द्रढयितुम् अष्ट घोषणाः विहिताः। व्यापार-निवेशं समेधितुम् 'चीफ्-एग्जीक्यूटिव्-ऑफिसर्स्-फोरम्' इत्यस्य स्थापना अपि एतासु अन्यतमा वर्तते। वार्ताहर-सम्मेलनं सम्बोधयन् भारतीय विदेशसचिवः विक्रम-मिसरी अवदत् यत् जर्मनीराष्ट्राध्यक्षस्य भारतयात्रावधौ देशद्वयस्य मध्ये महत्त्वपूर्ण संवादः अभवत्।

सी.एस्.पी.ओ.सी.-सम्मेलनम्

सी.एस्.पी.ओ.सी.-इति राष्ट्रमण्डल-देशानां राष्ट्रिय-संसदाम् अध्यक्षाणां पीठासीनाधिकारिणां च अष्टाविंश-सम्मेलनस्य आयोजनं भारतं श्वः नवदिल्ल्यां करिष्यति। त्रिदिवसीयम् एतत् सम्मेलनं जनवरीमासस्य षोडश-दिनाङ्क-पर्यन्तं प्रवर्तिष्यते। लोकसभायाः अध्यक्षः ओम्-बिरला एतस्य सम्मेलनस्य अध्यक्षतां करिष्यति। नवदिल्ल्यां वार्ताहरान् सम्बोधयन् श्रीबिरला अवदत् यत् प्रधानमन्त्री नरेन्द्रमोदी जनवरी-मासस्य पञ्चदशे दिनाङ्के संविधान-सदनस्य ऐतिहासिके 'सेंट्रल् हॉल्'-इत्यत्र सम्मेलनस्य उद्घाटनं करिष्यति।

लोहड़ी-पर्व

शस्यानां पर्व 'लोहड़ी' अद्य आचर्यते। एषः शस्योत्सवः मुख्यरूपेण पञ्जाब-हरियाणा-हिमाचलप्रदेशेषु तत्समीप-वर्तिषु क्षेत्रेषु च आचर्यते। अयं उत्सवः पक्वसस्यानां हर्षेण सूर्यस्य उत्तरायणेन च सह सम्बद्धः अस्ति। राष्ट्रपतिः द्रौपदी मुर्मूः नागरिकान् लोहड़ी-पर्व अभिलक्ष्य अभिनन्दितवती। राष्ट्रपतिना स्वसन्देशे उक्तं यत् एते उत्सवाः देशस्य समृद्ध-कृषिपरम्पराणां प्रतीकभूताः सन्ति, अपि च राष्ट्रियैकतायाः भावनां च प्रदर्शयन्ति।

राष्ट्रपतिः/शुभकामनाः

राष्ट्रपतिः द्रौपदी मुर्मुः मकरसंक्रान्ति-पोङ्गल-माघबिहू-इत्येतेषां पर्वणां पूर्वसन्ध्यायां ह्यः देशवासिनः अभिनन्दितवती। एतानि पर्वाणि अद्य श्वः च देशस्य विभिन्नेषु भागेषु आमान्यन्ते। राष्ट्रपतिः अत्रावसरे उक्तवती यत् देशस्य समृद्ध-कृषिपरम्पराणां प्रतीकभूताः एते उत्सवाः राष्ट्रियैक्य-द्योतकाः सन्ति।

क्रिकेट्

'वुमन्स्–प्रीमियर्–लीग्–क्रिकेट्'-स्पर्धा-मालिकायां गतरात्रौ नवी-मुम्बय्यां रॉयल-चैलेन्जर्स्-बेङ्गलूरु-दलेन यूपी-वॉरियर्स्-दलं नवभिः क्रीडकैः पराजितम्। चतुश्चत्वारिंशदधिक-शत-धावनाङ्कानां विजय-लक्ष्यम् अनुसरता रॉयल-चैलेन्जर्स्-बेङ्गलूरु-दलेन एकस्य एव क्रीडकस्यस्य हानि-पुरस्सरम्-त्रयोदशे क्षेपचक्रे पञ्चचत्वारिंशदधिक-शत-धावनाङ्काः अर्जित्वा विजयः अधिगतः।